# ॥ वाल्मीकि रामायण॥

## ३ अरण्यकाण्ड

### अध्याय ६०

स दीनो दीनया वाचा लक्ष्मणं वाक्यमब्रवीत् ।
शीघ्रं लक्ष्मण जानीहि गत्वा गोदावरीं नदीम् ।
अपि गोदावरीं सीता पद्मान्यानयितुं गता ॥ १॥

एवमुक्तस्तु रामेण लक्ष्मणः पुनरेव हि ।
नदीं गोदावरीं रम्यां जगाम लघुविक्रमः ॥ २॥

तां लक्ष्मणस्तीर्थवतीं विचित्वा राममब्रवीत् ।
नैनां पश्यामि तीर्थेषु क्रोशतो न शृणोति मे ॥ ३॥

कं नु सा देशमापन्ना वैदेही क्लेशनाशिनी ।
न हि तं वेद्मि वै राम यत्र सा तनुमध्यमा ॥ ४॥

लक्ष्मणस्य वचः श्रुत्वा दीनः सन्ताप मोहितः ।
रामः समभिचक्राम स्वयं गोदावरीं नदीम् ॥ ५॥

स तामुपस्थितो रामः क्व सीतेत्येवमब्रवीत् ॥ ६॥

भूतानि राक्षसेन्द्रेण वधार्हेण हृताम् अपि ।
न तां शशंसू रामाय तथा गोदावरी नदी ॥ ७॥

ततः प्रचोदिता भूतैः शंसास्मै तां प्रियाम् इति ।
न च साभ्यवदत्सीतां पृष्टा रामेण शोचिता ॥ ८॥

रावणस्य च तद्रूपं कर्माणि च दुरात्मनः ।
ध्यात्वा भयात्तु वैदेहीं सा नदी न शशंस ताम् ॥ ९॥

निराशस्तु तया नद्या सीताया दर्शने कृतः ।
उवाच रामः सौमित्रिं सीतादर्शनकर्शितः ॥ १०॥

किं नु लक्ष्मण वक्ष्यामि समेत्य जनकं वचः ।
मातरं चैव वैदेह्या विना ताम् अहमप्रियम् ॥ ११॥

या मे राज्यविहीनस्य वने वन्येन जीवतः ।
सर्वं व्यपनयच्छोकं वैदेही क्व नु सा गता ॥ १२॥

ज्ञातिपक्षविहीनस्य राजपुत्रीमपश्यतः ।
मन्ये दीर्घा भविष्यन्ति रात्रयो मम जाग्रतः ॥ १३॥

गोदावरीं जनस्थानमिमं प्रस्रवणं गिरिम् ।
सर्वाण्यनुचरिष्यामि यदि सीता हि दृश्यते ॥ १४॥

एवं सम्भाषमाणौ तावन्योन्यं भ्रातरावुभौ ।
वसुन्धरायां पतितं पुष्पमार्गमपश्यताम् ॥ १५॥

तां पुष्पवृष्टिं पतितां दृष्ट्वा रामो महीतले ।
उवाच लक्ष्मणं वीरो दुःखितो दुःखितं वचः ॥ १६॥

अभिजानामि पुष्पाणि तानीमामीह लक्ष्मण ।
अपिनद्धानि वैदेह्या मया दत्तानि कानने ॥ १७॥

एवमुक्त्वा महाबाहुर्लक्ष्मणं पुरुषर्षभम् ।
क्रुद्धोऽब्रवीद्गिरिं तत्र सिंहः क्षुद्रमृगं यथा ॥ १८॥

तां हेमवर्णां हेमाभां सीतां दर्शय पर्वत ।
यावत्सानूनि सर्वाणि न ते विध्वंसयाम्यहम् ॥ १९॥

मम बाणाग्निनिर्दग्धो भस्मीभूतो भविष्यसि ।
असेव्यः सततं चैव निस्तृणद्रुमपल्लवः ॥ २०॥

इमां वा सरितं चाद्य शोषयिष्यामि लक्ष्मण ।
यदि नाख्याति मे सीतामद्य चन्द्रनिभाननाम् ॥ २१॥

एवं स रुषितो रामो दिधक्षन्निव चक्षुषा ।
ददर्श भूमौ निष्क्रान्तं राक्षसस्य पदं महत् ॥ २२॥

स समीक्ष्य परिक्रान्तं सीताया राक्षसस्य च ।
सम्भ्रान्तहृदयो रामः शशंस भ्रातरं प्रियम् ॥ २३॥

पश्य लक्ष्मण वैदेह्याः शीर्णाः कनकबिन्दवः ।
भूषणानां हि सौमित्रे माल्यानि विविधानि च ॥ २४॥

तप्तबिन्दुनिकाशैश्च चित्रैः क्षतजबिन्दुभिः ।
आवृतं पश्य सौमित्रे सर्वतो धरणीतलम् ॥ २५॥

मन्ये लक्ष्मण वैदेही राक्षसैः कामरूपिभिः ।

भित्त्वा भित्त्वा विभक्ता वा भक्षिता वा भविष्यति ॥ २६ ॥

तस्य निमित्तं वैदेह्या द्वयोर्विवदमानयोः ।
बभूव युद्धं सौमित्रे घोरं राक्षसयोरिह ॥ २७ ॥

मुक्तामणिचितं चेदं तपनीयविभूषितम् ।
धरण्यां पतितं सौम्य कस्य भग्नं महद्धनुः ॥ २८ ॥

तरुणादित्यसङ्काशं वैदूर्यगुलिकाचितम् ।
विशीर्णं पतितं भूमौ कवचं कस्य काञ्चनम् ॥ २९ ॥

छत्रं शतशलाकं च दिव्यमाल्योपशोभितम् ।
भग्नदण्डमिदं कस्य भूमौ सौम्य निपातितम् ॥ ३० ॥

काञ्चनोरश्छदाश्चेमे पिशाचवदनाः खराः ।
भीमरूपा महाकायाः कस्य वा निहता रणे ॥ ३१ ॥

दीप्तपावकसङ्काशो द्युतिमान्समरध्वजः ।
अपविद्धश्च भग्नश्च कस्य साङ्ग्रामिको रथः ॥ ३२ ॥

रथाक्षमात्रा विशिखास्तपनीयविभूषणाः ।
कस्येमेऽभिहता बाणाः प्रकीर्णा घोरकर्मणः ॥ ३३ ॥

वैरं शतगुणं पश्य ममेदं जीवितान्तकम् ।
सुघोरहृदयैः सौम्य राक्षसैः कामरूपिभिः ॥ ३४ ॥

हृता मृता वा सीता हि भक्षिता वा तपस्विनी ।
न धर्मस्त्रायते सीतां ह्रियमाणां महावने ॥ ३५ ॥

भक्षितायां हि वैदेह्यां हृतायामपि लक्ष्मण ।
के हि लोके प्रियं कर्तुं शक्ताः सौम्य ममेश्वराः ॥ ३६ ॥

कर्तारमपि लोकानां शूरं करुणवेदिनम् ।
अज्ञानादवमन्येरन्सर्वभूतानि लक्ष्मण ॥ ३७ ॥

मृदुं लोकहिते युक्तं दान्तं करुणवेदिनम् ।
निर्वीर्य इति मन्यन्ते नूनं मां त्रिदशेश्वराः ॥ ३८ ॥

मां प्राप्य हि गुणो दोषः संवृत्तः पश्य लक्ष्मण ।
अद्यैव सर्वभूतानां रक्षसामभवाय च ।
संहृत्यैव शशिज्योत्स्नां महान्सूर्य इवोदितः ॥ ३९ ॥

नैव यक्षा न गन्धर्वा न पिशाचा न राक्षसाः ।
किंनरा वा मनुष्या वा सुखं प्राप्स्यन्ति लक्ष्मण ॥ ४० ॥

ममास्त्रबाणसम्पूर्णमाकाशं पश्य लक्ष्मण ।
निःसम्पातं करिष्यामि ह्यद्य त्रैलोक्यचारिणाम् ॥ ४१ ॥

संनिरुद्धग्रहगणमावारितनिशाकरम् ।
विप्रनष्टानलमरुद्भास्करद्युतिसंवृतम् ॥ ४२ ॥

विनिर्मथितशैलाग्रं शुष्यमाणजलाशयम् ।
ध्वस्तद्रुमलतागुल्मं विप्रणाशितसागरम् ॥ ४३ ॥

न तां कुशलिनीं सीतां प्रदास्यन्ति ममेश्वराः ।
अस्मिन्मुहूर्ते सौमित्रे मम द्रक्ष्यन्ति विक्रमम् ॥ ४४ ॥

नाकाशमुत्पतिष्यन्ति सर्वभूतानि लक्ष्मण ।
मम चापगुणान्मुक्तैर्बाणजालैर्निरन्तरम् ॥ ४५ ॥

अर्दितं मम नाराचैर्ध्वस्तभ्रान्तमृगद्विजम् ।
समाकुलममर्यादं जगत्पश्याद्य लक्ष्मण ॥ ४६ ॥

आकर्णपूर्णैरिषुभिर्जीवलोकं दुरावरैः ।
करिष्ये मैथिलीहेतोरपिशाचमराक्षसं ॥ ४७ ॥

मम रोषप्रयुक्तानां सायकानां बलं सुराः ।
द्रक्ष्यन्त्यद्य विमुक्तानाममर्षाद्दूरगामिनाम् ॥ ४८ ॥

नैव देवा न दैतेया न पिशाचा न राक्षसाः ।
भविष्यन्ति मम क्रोधात्त्रैलोक्ये विप्रणाशिते ॥ ४९ ॥

देवदानवयक्षाणां लोका ये रक्षसाम् अपि ।
बहुधा निपतिष्यन्ति बाणौघैः शकुलीकृताः ।
निर्मर्यादानिमाँल्लोकान्करिष्याम्यद्य सायकैः ॥ ५० ॥

यथा जरा यथा मृत्युर्यथाकालो यथाविधिः ।
नित्यं न प्रतिहन्यन्ते सर्वभूतेषु लक्ष्मण ।
तथाहं क्रोधसंयुक्तो न निवार्योऽस्म्यसंशयम् ॥ ५१ ॥

पुरेव मे चारुदतीमनिन्दितां
दिशन्ति सीतां यदि नाद्य मैथिलीम् ।
सदेवगन्धर्वमनुष्य पन्नगं
जगत्सशैलं परिवर्तयाम्यहम् ॥ ५२ ॥

The files in this directory are revised versions of the digital files produced by Professor Muneo

Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

---

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

---

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com